# rakShoghna sUkta Rigveda Mandala 4 and 10

# રક્ષોઘ્ન સૂક્ત ઋગ્વેદઃ મણ્ડલં ૪ અથવા ૧૦

## Document Information

Text title : rakShoghnasUktam svarita

File name : rakShoghnasUkta.itx

Category : sUkta, veda, svara, rigveda

Location : doc_veda

Description-comments : Rigveda Mandala 4.004 and 10.087

Latest update : April 14, 2012

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# રક્ષોઘ્ન સૂક્ત ઋગ્વેદઃ મણ્ડલં ૪ અથવા ૧૦

કૃણુષ્વ પાજઃ પ્રસિતિં ન પૃથ્વીં યાહિ રાજેવામવાઁ ઇભેન ।
તૃષ્વીમનુ પ્રસિતિં દ્રૂણાનોઽસ્તાસિ વિધ્ય રક્ષસસ્તપિષ્ઠૈઃ ॥ ૪.૦૦૪.૦૧
તવ ભ્રમાસ આશુયા પતન્ત્યનુ સ્પૃશ ધૃષતા શોશુચાનઃ ।
તપૂંષ્યગ્ને જુહ્વા પતંગાનસંદિતો વિ સૃજ વિષ્વગુલ્કાઃ ॥ ૪.૦૦૪.૦૨
પ્રતિ સ્પશો વિ સૃજ તૂર્ણિતમો ભવા પાયુર્વિશો અસ્યા અદબ્ધઃ ।
યો નો દૂરે અઘશંસો યો અન્ત્યગ્ને માકિષ્ટે વ્યથિરા દધર્ષીત્ ॥ ૪.૦૦૪.૦૩
ઉદગ્ને તિષ્ઠ પ્રત્યા તનુષ્વ ન્યમિત્રાઁ ઓષતાત્તિગ્મહેતે ।
યો નો અરાતિં સમિધાન ચક્રે નીચા તં ધક્ષ્યતસં ન શુષ્કમ્ ॥ ૪.૦૦૪.૦૪
ઊર્ધ્વો ભવ પ્રતિ વિધ્યાધ્યસ્મદાવિષ્કૃણુષ્વ દૈવ્યાન્યગ્ને ।
અવ સ્થિરા તનુહિ યાતુજૂનાં જામિમજામિં પ્ર મૃણીહિ શત્રૂન્ ॥ ૪.૦૦૪.૦૫
સ તે જાનાતિ સુમતિં યવિષ્ઠ ય ઈવતે બ્રહ્મણે ગાતુમૈરત્ ।
વિશ્વાન્યસ્મૈ સુદિનાનિ રાયો દ્યુમ્નાન્યર્યો વિ દુરો અભિ દ્યૌત્ ॥ ૪.૦૦૪.૦૬
સેદગ્ને અસ્તુ સુભગઃ સુદાનુર્યસ્ત્વા નિત્યેન હવિષા ય ઉક્થૈઃ ।
પિપ્રીષતિ સ્વ આયુષિ દુરોણે વિશ્વેદસ્મૈ સુદિના સાસદિષ્ટિઃ ॥ ૪.૦૦૪.૦૭
અર્ચામિ તે સુમતિં ઘોષ્યર્વાક્સં તે વાવાતા જરતામિયં ગીઃ ।
સ્વશ્વાસ્ત્વા સુરથા મર્જયેમાસ્મે ક્ષત્રાણિ ધારયેરનુ દ્યૂન્ ॥ ૪.૦૦૪.૦૮
ઇહ ત્વા ભૂર્યા ચરેદુપ ત્મન્દોષાવસ્તર્દીદિવાંસમનુ દ્યૂન્ ।
ક્રીળન્તસ્ત્વા સુમનસઃ સપેમાભિ દ્યુમ્ના તસ્થિવાંસો જનાનામ્ ॥ ૪.૦૦૪.૦૯
યસ્ત્વા સ્વશ્વઃ સુહિરણ્યો અગ્ન ઉપયાતિ વસુમતા રથેન ।
તસ્ય ત્રાતા ભવસિ તસ્ય સખા યસ્ત આતિથ્યમાનુષગ્જુજોષત્ ॥ ૪.૦૦૪.૧૦
મહો રુજામિ બન્ધુતા વચોભિસ્તન્મા પિતુર્ગોતમાદન્વિયાય ।
ત્વં નો અસ્ય વચસશ્ચિકિદ્ધિ હોતર્યવિષ્ઠ સુક્રતો દમૂનાઃ ॥ ૪.૦૦૪.૧૧

અસ્વપ્નજસ્તરણયઃ સુશેવા અતન્દ્રાસોઽવૃકા અશ્રમિષ્ઠાઃ ।

તે પાયવઃ સધ્ર્યઞ્ચો નિષદ્યાગ્ને તવ નઃ પાન્ત્વમૂર ॥ ૪.૦૦૪.૧૨

યે પાયવો મામતેયં તે અગ્ને પશ્યન્તો અન્ધં દુરિતાદરક્ષન્ ।

રરક્ષ તાન્સુકૃતો વિશ્વવેદા દિપ્સન્ત ઇદ્રિપવો નાહ દેભુઃ ॥ ૪.૦૦૪.૧૩

ત્વયા વયં સધન્ય૧સ્ત્વોતાસ્તવ પ્રણીત્યશ્યામ વાજાન્ ।

ઉભા શંસા સૂદય સત્યતાતેઽનુષ્ઠુયા કૃણુહ્યહ્રયાણ ॥ ૪.૦૦૪.૧૪

અયા તે અગ્ને સમિધા વિધેમ પ્રતિ સ્તોમં શસ્યમાનં ગૃભાય ।

દહાશસો રક્ષસઃ પાહ્ય૧સ્માન્દ્રુહો નિદો મિત્રમહો અવદ્યાત્ ॥ ૪.૦૦૪.૧૫

---

રક્ષોહણં વાજિનમા જિઘર્મિ મિત્રં પ્રથિષ્ઠમુપ યામિ શર્મ ।

શિશાનો અગ્નિઃ ક્રતુભિઃ સમિદ્ધઃ સ નો દિવા સ રિષઃ પાતુ નક્તમ્ ॥ ૧૦.૦૮૭.૦૧

અયોદંષ્ટ્રો અર્ચિષા યાતુધાનાનુપ સ્પૃશ જાતવેદઃ સમિદ્ધઃ ।

આ જિહ્વયા મૂરદેવાન્રભસ્વ ક્રવ્યાદો વૃક્ત્વ્યપિ ધત્સ્વાસન્ ॥ ૧૦.૦૮૭.૦૨

ઉભોભયાવિન્નુપ ધેહિ દંષ્ટ્રા હિંસ્રઃ શિશાનોઽવરં પરં ચ ।

ઉતાન્તરિક્ષે પરિ યાહિ રાજઞ્જમ્ભૈઃ સં ધેહ્યભિ યાતુધાનાન્ ॥ ૧૦.૦૮૭.૦૩

યજ્ઞૈરિષૂઃ સંનમમાનો અગ્ને વાચા શલ્યાઁ અશનિભિર્દિહાનઃ ।

તાભિર્વિધ્ય હૃદયે યાતુધાનાન્પ્રતીચો બાહૂન્પ્રતિ ભઙ્ધ્યેષામ્ ॥ ૧૦.૦૮૭.૦૪

અગ્ને ત્વચં યાતુધાનસ્ય ભિન્ધિ હિંસ્રાશનિર્હરસા હન્ત્વેનમ્ ।

પ્ર પર્વાણિ જાતવેદઃ શ◌ૃણીહિ ક્રવ્યાત્ક્રવિષ્ણુર્વિ ચિનોતુ વૃક્ણમ્ ॥ ૧૦.૦૮૭.૦૫

યત્રેદાનીં પશ્યસિ જાતવેદસ્તિષ્ઠન્તમગ્ન ઉત વા ચરન્તમ્ ।

યદ્વાન્તરિક્ષે પથિભિઃ પતન્તં તમસ્તા વિધ્ય શર્વા શિશાનઃ ॥ ૧૦.૦૮૭.૦૬

ઉતાલબ્ધં સ્પૃણુહિ જાતવેદ આલેભાનાદૃષ્ટિભિર્યાતુધાનાત્ ।

અગ્ને પૂર્વો નિ જહિ શોશુચાન આમાદઃ ક્ષ્વિઙ્કાસ્તમદન્ત્વેનીઃ ॥ ૧૦.૦૮૭.૦૭

ઇહ પ્ર બ્રૂહિ યતમઃ સો અગ્ને યો યાતુધાનો ય ઇદં કૃણોતિ ।

તમા રભસ્વ સમિધા યવિષ્ઠ નૃચક્ષસશ્ચક્ષુષે રન્ધયૈનમ્ ॥ ૧૦.૦૮૭.૦૮

તીક્ષ્ણેનાગ્ને ચક્ષુષા રક્ષ યજ્ઞં પ્રાઞ્ચં વસુભ્યઃ પ્ર ણય પ્રચેતઃ ।

હિંસ્રં રક્ષાંસ્યભિ શોશુચાનં મા ત્વા દભન્યાતુધાના નૃચક્ષઃ ॥ ૧૦.૦૮૭.૦૯

નૃચક્ષા રક્ષઃ પરિ પશ્ય વિક્ષુ તસ્ય ત્રીણિ પ્રતિ શ઼ૃણીહ્યગ્રા ।
તસ્યાગ્ને પૃષ્ટીર્હરસા શ઼ૃણીહિ ત્રેધા મૂલં યાતુધાનસ્ય વૃશ્ચ ॥ ૧૦.૦૮૭.૧૦
ત્રિર્યાતુધાનઃ પ્રસિતિં ત એત્વૃતં યો અગ્ને અનૃતેન હન્તિ ।
તમર્ચિષા સ્ફૂર્જયઞ્જાતવેદઃ સમક્ષમેનં ગૃણતે નિ વૃઙ્ધિ ॥ ૧૦.૦૮૭.૧૧
તદગ્ને ચક્ષુઃ પ્રતિ ધેહિ રેભે શફારુજં યેન પશ્યસિ યાતુધાનમ્ ।
અથર્વવજ્જ્યોતિષા દૈવ્યેન સત્યં ધૂર્વન્તમચિતં ન્યોષ ॥ ૧૦.૦૮૭.૧૨
યદગ્ને અદ્ય મિથુના શપાતો યદ્વાચસ્તૃષ્ટં જનયન્ત રેભાઃ ।
મન્યોર્મનસઃ શરવ્યાઉ જાયતે યા તયા વિધ્ય હૃદયે યાતુધાનાન્ ॥ ૧૦.૦૮૭.૧૩
પરા શ઼ૃણીહિ તપસા યાતુધાનાન્પરાગ્ને રક્ષો હરસા શ઼ૃણીહિ ।
પરાર્ચિષા મૂરદેવાઞ્છૃણીહિ પરાસુતૃપો અભિ શોશુચાનઃ ॥ ૧૦.૦૮૭.૧૪
પરાદ્ય દેવા વૃજિનં શ઼ૃણન્તુ પ્રત્યગેનં શપથા યન્તુ તૃષ્ટાઃ ।
વાચાસ્તેનં શરવ ઋચ્છન્તુ મર્મન્વિશ્વસ્યૈતુ પ્રસિતિં યાતુધાનઃ ॥ ૧૦.૦૮૭.૧૫
યઃ પૌરુષેયેણ ક્રવિષા સમઙ્ક્તે યો અશ્વ્યેન પશુના યાતુધાનઃ ।
યો અઘ્ન્યાયા ભરતિ ક્ષીરમગ્ને તેષાં શીર્ષાણિ હરસાપિ વૃશ્ચ ॥ ૧૦.૦૮૭.૧૬
સંવત્સરીણં પય ઉસ્રિયાયાસ્તસ્ય માશીદ્યાતુધાનો નૃચક્ષઃ ।
પીયૂષમગ્ને યતમસ્તિતૃપ્સાત્તં પ્રત્યઞ્ચમર્ચિષા વિધ્ય મર્મન્ ॥ ૧૦.૦૮૭.૧૭
વિષં ગવાં યાતુધાનાઃ પિબન્ત્વા વૃશ્ચ્યન્તામદિતયે દુરેવાઃ ।
પરૈનાન્દેવઃ સવિતા દદાતુ પરા ભાગમોષધીનાં જયન્તામ્ ॥ ૧૦.૦૮૭.૧૮
સનાદગ્ને મૃણસિ યાતુધાનાન્ન ત્વા રક્ષાંસિ પૃતનાસુ જિગ્યુઃ ।
અનુ દહ સહમૂરાન્ક્રવ્યાદો મા તે હેત્યા મુક્ષત દૈવ્યાયાઃ ॥ ૧૦.૦૮૭.૧૯
ત્વં નો અગ્ને અધરાદુદક્તાત્ત્વં પશ્ચાદુત રક્ષા પુરસ્તાત્ ।
પ્રતિ તે તે અજરાસસ્તપિષ્ઠા અઘશંસં શોશુચતો દહન્તુ ॥ ૧૦.૦૮૭.૨૦
પશ્ચાત્પુરસ્તાદધરાદુદક્તાત્કવિઃ કાવ્યેન પરિ પાહિ રાજન્ ।
સખે સખાયમજરો જરિમ્ણેઽગ્ને મર્તાઁ અમર્ત્યસ્ત્વં નઃ ॥ ૧૦.૦૮૭.૨૧
પરિ ત્વાગ્ને પુરં વયં વિપ્રં સહસ્ય ધીમહિ ।
ધૃષદ્વર્ણં દિવેદિવે હન્તારં ભઙ્ગુરાવતામ્ ॥ ૧૦.૦૮૭.૨૨
વિષેણ ભઙ્ગુરાવતઃ પ્રતિ ષ્મ રક્ષસો દહ ।

અગ્ને તિગ્મેન શોચિષા તપુરગ્રાભિરૃષ્ટિભિઃ ॥ ૧૦.૦૮૭.૨૩
પ્રત્યગ્ને મિથુના દહ યાતુધાના કિમીદિના ।
સં ત્વા શિશામિ જાગૃહ્યદબ્ધં વિપ્ર મન્મભિઃ ॥ ૧૦.૦૮૭.૨૪
પ્રત્યગ્ને હરસા હરઃ શ◌ૃણીહિ વિશ્વતઃ પ્રતિ ।
યાતુધાનસ્ય રક્ષસો બલં વિ રુજ વીર્યમ્ ॥ ૧૦.૦૮૭.૨૫

Audio http://www.rAga.com/play/?id=77481

---

*rakShoghna sUkta Rigveda Mandala 4 and 10*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*